# श्री श्री माँ के आश्रम में गीत

## नित्य कीर्तन और प्रभाती कीर्तन

१

श्रीश्रीमातृका-ध्यान

ॐ धृत-सहज-समाधिं बिभ्रतीं हेमकान्ति
नयन-सरसिजाभ्यां स्नेहराशीन् किरन्तीम् ।
मनसि कलितभक्तिं भक्तमानन्दयन्तीं
स्मितजितशरदिन्दुं मातरं धीमहीह ॥१॥

तपन-शकल-कल्पं कल्पवृक्षोपमानं
शरणागतजनानां तारकं क्लेशपाशात् ।
हृदय-कमलमध्ये स्थापयित्वेह मातुः
विहितविविधकल्पं पादपीठं भजामः ॥२॥

२

भजो माँ आनन्दमयी, जपो माँ आनन्दमयी,
गाहो माँ आनन्दमयीर नाम रे ।
भजो माँ, जपो माँ, गाओ माँ, बलो माँ,
डाको माँ माँ माँ माँ माँ माँ माँ ।

३

जय शिव शङ्कर, बम बम हर हर
हर, हर, हर, हर, हर, हर, हे ।

हरे मुरारे राम राम हरे हरे
राआम, राआम, राआम हरे।
( जय ) राम, राम, राम, हरे।

४

## गुरु-स्तोत्रम्

भवसागर - तारण - कारण हे।
रविनन्दन - बन्धन - खण्डन हे।
शरणागत - किङ्कर - भीत मने।
गुरुदेव दया करो दीन जने॥ १ ॥

हृदि - कन्दर - तामस - भास्कर हे।
तुम विष्णु प्रजापति शङ्कर हे।
परब्रह्म परात्पर वेद भने।
गुरुदेव दया करो दीन जने॥ २ ॥

मन - वारण - शासन - अङ्कुश हे।
नरत्राण तरे हरि चाक्षुष हे।
गुणगान - परायण देवगणे।
गुरुदेव दया करो दीन जने॥ ३ ॥

कुलकुण्डलिनी - घुम - भञ्जक हे।[1]
हृदि - ग्रन्थि - विदारण - कारक हे।
मम मानस चञ्चल रात्रि - दिने।
गुरुदेव दया करो दीन जने॥ ४ ॥

१. घुम = निद्रा।





रिपुसूदन मङ्गल - नायक हे।
सुख - शान्ति - वराभय - दायक हे।
त्रयताप हरे तव नाम - गाने।
गुरुदेव दया करो दीन जने॥ ५ ॥

अभिमान - प्रभाव - विनाशक हे।
गतिहीन जने तुमि रक्षक हे।
चित शङ्कित वञ्चित भक्तिधने,
गुरुदेव दया करो दीन जने॥ ६ ॥

तव नाम सदा शुभ साधक हे।
पतिताधम - मानव - पावक हे।
महिमा तव गोचर शुद्ध मने,
गुरुदेव दया करो दीन जने॥ ७ ॥

जय सद्गुरु ईश्वर - प्रापक हे।
भव - रोग - विकार - विनाशक हे।
मन येनो रहे तव श्रीचरणे,
गुरुदेव दया करो दीन जने॥ ८ ॥

५

हरिबोल, हरिबोल, हरिबोल, हरिबोल।
हरिबोल, हरिबोल, हरिबोल, हरिबोल ......

## प्रणाम-मंत्र

१

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत् पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥ १ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ ३ ॥

गुरोर्मध्ये स्थिता माता मातृमध्ये स्थितो गुरुः।
गुरुर्माता नमस्तेऽस्तु मातृगुरुं नमाम्यहम् ॥ ४ ॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोःपदम्।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोःकृपा ॥ ५ ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ६ ॥

२

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ १ ॥

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ २ ॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमयि नारायणि नमोऽस्तु ते ॥ ३ ॥

शरणागत - दीनार्त्त - परित्राण - परायणे।
सर्वस्यार्त्तिहरे देवि नारायणि नमोऽस्तु ते ॥ ४ ॥

भवतापप्रणाशिन्यै आनन्दघन - मूर्त्तये।
ज्ञान-भक्ति-प्रदायिन्यै मातस्तुभ्यं नमोनमः ॥ ५ ॥





३

जयन्ती मङ्गलकाली भद्रकाली कपालिनी।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

४

अन्नपूर्णे सदापूर्णे शङ्कर - प्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥
माता मे पार्वती देवी पिता देवो महेश्वरः।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥

५

विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखर - भूषणाय।
कर्पूरकुन्दधवलाय जटाधराय
दारिद्र्य-दुःख-दहनाय नमः शिवाय ॥ १ ॥

नमः शिवाय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं गतिस्त्वं परमेश्वर ॥ २ ॥

६

सद्यः पातकसंहन्त्री सद्यो दुःखविनाशिनी।
सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥

७

रामाय रामचन्द्राय रामभद्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १ ॥
आपदाम् अपहर्त्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २ ॥

८

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः॥ १ ॥
कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतक्लेशनाशाय गोविन्दाय नमोनमः॥ २ ॥
हे कृष्ण करुणासिन्धो दीनबन्धो जगत्पते।
गोपेश गोपिकाकान्त राधाकान्त नमोऽस्तु ते॥ ३ ॥
पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः।
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो हरिः॥ ४ ॥

९

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव॥ १ ॥
असतो मा सद्गमय तमसो मा ज्योतिर्गमय।
मृत्योर्माऽमृतं गमय आविराविर्म एधि॥ २ ॥

१०

यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद् भवेत्।
पूर्णं भवतु तत् सर्वं त्वत्प्रसादान्महेश्वरि॥

११

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
ॐ शान्तिः शान्तिः शान्तिः
हरि ओम् तत्सत्

■